Class-10

# SANSKRIT
## (ACADEMIC)

GENERAL EDUCATION DEPARTMENT

SAMAGRA SHIKSHA, KERALA

# अभ्यासपत्रिका

## एककम् - १

## जीवनम्

## पाठः -१. आयुरारोग्यसौख्यम्।

**1. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।**

क) भूगतौ अश्विनीसुतौ कौ? ........................................................

( सुखदुःखौ, परिश्रममिताहारौ, कामक्रोधौ, शीतोष्णौ )

ख) सुखदुःखयोः कर्ता कः ? ........................................................

( आत्मा, बुद्धिः, मनः, शरीरम् )

ग) लाभानां किं श्रेष्ठम्? ........................................................

( आरोग्यम्, तुष्टिः, श्रुतम्, दाक्ष्यम् )

घ) धन्यानाम् उत्तमं किम्? ........................................................

( श्रुतम्, दाक्ष्यम्, आरोग्यम्, तुष्टिः )

**2. सूचनानुसारं गद्यक्रमं लिखत।**

क) परिश्रमो मिताहारो
भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये।।

परिश्रमः ....................... भूगतौ ....................... तौ अनादृत्य ....................... अन्यं ...........

अहं ................ समाश्रये।

ख) शनैरर्थः शनैः पन्थाः
शनैः पर्वतमारुहेत्।
शनैर्विद्या च धर्मश्च
व्यायामश्च शनैः शनैः।।

अर्थः ....................... पन्थाः शनैः ....................... आरुहेत्, ....................... शनैः, धर्मः

................ ....... ....................... व्यायामः च।

ग) आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्।।

...................... कर्तारम् ...................... मन्येत। तस्मात् ...................... मार्गं प्रतिपद्येत

....... ................ ।

घ) धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम्।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा।।

धन्यानां ...................... उत्तमम् ...................... श्रुतम् ...................... लाभानाम्

...................... श्रेष्ठम्। ...................... तुष्टिः ...................... ।

## 3. सूचनाः उपयुज्य आरोग्यसंरक्षणमधिकृत्य लघुटिप्पणीं लिखत।

सूचनाः - मिताहारशीलः — भूगतौ अश्विनीसुतौ — व्यायामशीलः — ईर्ष्यादिभावनां विहाय — आरोग्यसंरक्षणम्।

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

## 4. उदाहरणानुसारं लिखत।

**उदा** - देही - देहः अस्य अस्ति इति देही।
प्राणी - ......................................................................
मिताहाराः - मितश्च असौ आहारश्च।
हिताहारः - ......................................................................

**5. श्लोकानामाशयं कोष्ठकात् चित्वा लिखत।**

| |
|---|
| पथि गमनं, पर्वतारोहणं मन्दमेव करणीयम्। |
| परिश्रमः मिताहारः च आरोग्याय उत्तमं भवति। |
| स्वस्थचित्तेन सेव्यमानः अन्नम् आरोग्याय भवति। |
| लाभानाम् आरोग्यं श्रेष्ठम्। |
| सुखदुःखयोः कारणं स्वकर्म एव। |

क) परिश्रमो मिताहारो
भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये।

ख) शनैरर्थः शनैः पन्थाः
शनैः पर्वतमारुहेत्।
शनैर्विद्या च धर्मश्च
व्यायामश्च शनैः शनैः।

ग) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।

घ) आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्।।

ङ) धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम्।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा।।

**6. श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये।

क) श्लोके व्यायामः इत्यर्थकं पदं किम्? ...........................................

ख) अस्मिन् श्लोके अश्विनीसुतसमानौ कौ? ...........................................

ग) **'नैव'** इत्यस्य पदच्छेदः कः? ...........................................

घ) श्लोकात् ल्यबन्तम् अव्ययपदं चित्वा लिखत। ...........................................

**7. "जीविते सुखस्य दुःखस्य च हेतुः स्वस्य कर्म एवेति अवगच्छेत्" इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।**

क) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।

ख) आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्।।

...........................................................................................

...........................................................................................

...........................................................................................

...........................................................................................

**8. उदाहरणानुसारं पदच्छेदं लिखत।**

**क) तेनैव – तेन + एव।**

चैव – .................... + ....................

अत्रैव – .................... + ....................

तत्रैव – .................... + ....................

# पाठः - २. दीनवत्सला जननी।

**1. उदाहरणानुसारं पदच्छेदं लिखत।**

**क) कुर्वन्नासीत् – कुर्वन् + आसीत् ।**

गच्छन्नासीत् – .................... + ....................

पठन्नासीत् – .................... + ....................

वदन्नासीत् – .................... + ....................

रुदन्नासीत् – .................... + ....................

**ख) सर्वेष्वपत्येषु - सर्वेषु + अपत्येषु।**

ग्रन्थेष्वन्यतमः – .................... + ....................

काव्येष्वन्यतमः – .................... + ....................

विषयेष्वन्यतमः – .................... + ....................

**ग) नोत्थितः - न + उत्थितः**

नोचितः - .................... + ....................

नोदितः - .................... + ....................

**2. शतृशानजन्तरूपाणि विविच्य पट्टिकां लिखत।**

| | | | | |
|---|---|---|---|---|
| **नुद्यमानः,** | **पठन्,** | **गम्यमानः,** | **प्रेरयन्,** | **पचन्,** |
| **जल्पमानः,** | **वन्दमानः,** | **ताडयन्,** | **पचमानः,** | **रुदन्,** |
| **लिखन्,** | **पठ्यमानः,** | **गच्छन्,** | **कम्पमानः** | |

| **शत्रन्तरूपाणि** | **शानजन्तरूपाणि** |
|---|---|
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |

**3. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।**

क) सर्वधेनूनां माता का? ( लक्ष्मी, सुरभिः, अपर्णा, गौरी )

.......................................................

ख) वृषभः इत्यस्य समानार्थकं पदं किम्? ( गजः, अश्वः, बलीवर्दः, गर्दभः )

.......................................................

ग) दीनवत्सला जननी इति पाठः कस्मिन् ग्रन्थे अन्तर्भवति? ( भागवते, रामायणे, महाभारते, कर्णभारे)

.......................................................

घ) किं गणे नान्तर्भवति? (रुदन्, पचमानः, लिखन्, वदन्)

.......................................................

ङ) अयि शुभे! किमेवं रोदिषि? कस्य वचनमिदम्?

( असुराधिपस्य, सुराधिपस्य, नराधिपस्य, देशाधिपस्य )

.......................................................

## 4. उदाहरणानुसारं पट्टिकां पूरयत।

क)

| | लङ् | लट् | लोट् |
|---|---|---|---|
| उदा - | **अत्रसत्** | **त्रसति** | **त्रसतु** |
| | ......................... | पठति | ......................... |
| | ......................... | ......................... | वदतु |
| | अलिखत् | ......................... | ......................... |
| | ......................... | भवति | ......................... |
| | ......................... | ......................... | पृच्छतु |

ख)

| | लट् | लोट् | विधिलिङ् |
|---|---|---|---|
| उदा - | **पठति** | **पठतु** | **पठेत्** |
| | लिखति | ......................... | ......................... |
| | ......................... | वदतु | ......................... |
| | गच्छति | ......................... | ......................... |
| | ......................... | ......................... | भवेत् |
| | गायति | ......................... | ......................... |

## 5. यथोचितं योजयत।

महाभारतम् - सम्बोधना
सुरभिः - इन्द्रः
कृषक ! - व्यासः
आखण्डलः - धेनूनां माता

**महाभारतम्** - .....................................
**सुरभिः** - .....................................
**कृषक !** - .....................................
**आखण्डलः** - .....................................

**6. क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि विविच्य लिखत।**

| | | | | |
|---|---|---|---|---|
| पठित्वा, | पीत्वा, | निशम्य, | लेखित्वा | परिपाल्य, |
| वोढुम्, | समेत्य, | चलितुम्, | श्रोतुम्, | श्रुत्वा, |
| विज्ञाय, | गत्वा, | प्राप्य, | गन्तुम्, | पठितुम् |

| क्त्वान्तपदानि | ल्यबन्तपदानि | तुमुन्नन्तपदानि |
|---|---|---|
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |

**7. कोष्ठकात् समानार्थकपदानि चित्वा लिखत।**

(कृषकः, वासवः, ऋषभः, नेत्रम्, पुत्रः, )

**उदा - कृषीवलः - कृषकः**

इन्द्रः - ...........................

तनयः - ...........................

नयनम् - ...........................

बलीवर्दः - ...........................

**8. उदाहरणानुसारं विग्रहं लिखत।**

**सुराधिपः - सुराणाम् अधिपः।**

देवाधिपः - ...........................

धनाधिपः - ...........................

नराधिपः - ...........................

## 9. कोष्ठकात् पदानि स्वीकृत्य अधोदत्तान् सम्भाषणांशान् लिखत।

(ताडयति, वासव, अधिकवात्सल्यम्, किमर्थं )

इन्द्रः - वत्से! .................... विलपति?

सुरभिः - भो ....................! मम पुत्रस्य दैन्यतां दृष्ट्वा विलपामि।

इन्द्रः - पुत्रस्य किम् अभवत्?

सुरभिः - मम दुर्बलं पुत्रं कृषकः .........................।

इन्द्रः - सहस्राधिकपुत्रवती भवती किमर्थम् अस्मिन् पुत्रे ...................... प्रकटयति?

सुरभिः - दुर्बले सुते अधिकवात्सल्यं मातृसहजा एव।

इन्द्रः - चिन्ता मास्तु। सर्वं शुभं जायेत।

## 10. खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत।

व्यासेन विरचितमितिहासकाव्यं भवति महाभारतम्। महाभारतमधिकृत्य विद्यमाना "व्यासोच्छिष्टं जगत्सर्वम्" इत्युक्तिः प्रसिद्धा एव। प्रपञ्चेऽस्मिन् मातृस्नेहः अतिमहनीयः भवति। महाभारतस्य वनपर्वणि धृतराष्ट्रं प्रति व्यासोक्ता मातृवात्सल्यप्रतिपादिका एका कथा अस्ति। सा कथा दीनेषु अनुकम्पां प्रतिपादयति।

१. महाभारतस्य कर्ता कः? ...................................................

२. प्रपञ्चेऽस्मिन् - इत्यस्य सन्धिरूपं लिखत। ...................................................

३. महाभारतमधिकृत्य विद्यमाना प्रसिद्धा उक्तिः का? ...................................................

४. "दया" इत्यस्य समानार्थकपदं खण्डिकायाः चित्वा लिखत।...............................................

## 11. अधोदत्तवाक्यात् सम्बोधनरूपाणि चित्वा लिखत।

१. गच्छ वत्से! सर्वं भद्रं जायेत। ................................

२. अयि शुभे! किमेवं रोदिषि? ................................

३. भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। ................................

## 12. प्रादेशिकभाषया लिखत।

विश्वप्रसिद्धः महाकविः भवति कालिदासः। तेन त्रीणि नाटकानि द्वे महाकाव्ये च विरचितानि। मेघदूतं नाम सन्देशकाव्यं च तेन विरचितं भवति। "उपमा कालिदासस्य" इति उक्तिः सुप्रसिद्धा एव। अभिज्ञानशाकुन्तले पुरुवंशराजस्य दुष्यन्तस्य शकुन्तलायाः च कथा वर्ण्यते। नाटकस्य इतिवृत्तं महाभारतात् स्वीकृतं भवति।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

## 13. उदाहरणानुसारं वाक्यं परिवर्तयत।

**उदा** - अहं पाठं सुष्ठु अपठम्। पूर्णमङ्कं न सम्प्राप्तवान्।
**यद्यपि** अहं पाठं सुष्ठु अपठम् **तथापि** पूर्णमङ्कं न सम्प्राप्तवान्।

क) मातुः बहवः पुत्राः सन्ति। दीने पुत्रे कृपार्द्रहृदया भवति।

..........................................................................................................................

ख) जनाः मृगशालाम् अगच्छन्। तत्र प्रवेशनं न लभ्यते।

..........................................................................................................................

ग) रमेशः यथासमयं बस् निस्थानं प्रप्तः। बस् न लब्धम्।

..........................................................................................................................

घ) पितामहः सम्पूर्णम् औषधं अपिबत्। रोगशमनं न अभवत्।

..........................................................................................................................

ङ) ग्रन्थालये अनेकानि पुस्तकानि सन्ति। कानिचित् उपयोगशून्यानि आसन्।

..........................................................................................................................

# पाठः -३ मधुमान् नो वनस्पतिः।

**1. अधोदत्तानाम् औषधसस्यानां गुणान् लिखत।**

(ऊर्जप्रदायिनी, सर्वविषहारिणी, व्रणनाशकः, विषहारिणी)

हरिद्रा - ........................................

आमलकी - ........................................

निम्बः - ........................................

तुलसी - ........................................

**2. वृक्षः वनस्पतिः वीरुत् ओषधिः इति क्रमेण सस्यानां पट्टिकां लिखत।**

कदली, पनसः, द्राक्षा, पूगः, अश्वत्थः, इक्षुः, आम्रः, कर्कटी,
गोधूमः, व्रीहिः, नालीकेरः, कूश्माण्डः, यावनालः, उदुम्बरः,

| वृक्षः | वनस्पतिः | वीरुत् | ओषधिः |
|---|---|---|---|
| ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... |
| ............... | ............... | ............... | ............... |

**3. अधोदत्ताः सूचनाः स्वीकृत्य सस्यसंरक्षणम् अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः -** महाभारतं – सुरपालः – नास्ति सस्यमनौषधम् – वृक्षायुर्वेदः – सस्यसंरक्षणम् – हरितः – निम्बः – तुलसी।

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

**4. अधोदत्ताः सूचनाः स्वीकृत्य "सस्यप्रभेदाः" अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः -** नास्ति सस्यमनौषधम् – सस्यानि मानवजीवनोपकारिणी – सुरपालः – वृक्षायुर्वेदः – सस्यभेदाः – वनस्पतिः – वीरुत् – ओषधिः – वृक्षः।

.................................................................................................

.................................................................................................

.................................................................................................

.................................................................................................

**5. कोष्ठकात् पदानि स्वीकृत्य पट्टिकां लिखत।**

**( कर्कटी, वनस्पतिः, ओषधिः, फलात् पूर्वं पुष्पम् )**

| **विभागः** | **लक्षणम्** | **उदाहरणम्** |
|---|---|---|
| .................. | अव्यक्तपुष्पः | पनसः |
| वृक्षः | .................. | आम्रः |
| वीरुत् | प्रतानैः प्रसारिता | .................. |
| ................. | फलपाकान्ता | कदली |

**6. यथोचितं योजयत।**

वृक्षायुर्वेदः - पनसः
शान्तिपर्वः - सुरपालः
दशपुत्रसमः - महाभारतम्
अव्यक्तपुष्पः - द्रुमः

**वृक्षायुर्वेदः -** ....................................

**शान्तिपर्वः -** ....................................

**दशपुत्रसमः -** ....................................

**अव्यक्तपुष्पः -** ....................................

**7. उदाहरणानुसारं लिखत।**

| | | | | |
|---|---|---|---|---|
| **क)** | **उदा -** | **ओषधिश्च -** | | **ओषधिः + च** |
| | | भूपतिश्च | - | ...................+.............. |
| | | कविश्च | - | ...................+.............. |
| | | प्रजापतिश्च | - | ...................+.............. |
| **ख)** | **उदा -** | **हेतुरभूत्** | **-** | **हेतुः + अभूत्** |
| | | वायुरस्ति | - | .................+.............. |
| | | गुरुरयम् | - | .................+.............. |
| | | विष्णुरपि | - | .................+.............. |
| **ग)** | **उदा -** | **सम्पन्नेऽस्मिन्** | **-** | **सम्पन्ने + अस्मिन्** |
| | | नाटकेऽस्मिन् | - | .................+...................... |
| | | काव्येऽस्मिन् | - | .................+...................... |
| | | लोकेऽस्मिन् | - | .................+...................... |

**8. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

१. दशकूपसमा ..................। ..........................................
   ( पुत्रः, द्रुमः, सरः, वापी)

२. वृक्षायुर्वेदस्य कर्ता कः? ..........................................
   ( महीपालः, सुरपालः, शिशुपालः, धनपालः)

३. अव्यक्तपुष्पः यः फलति सः .................। ..........................................
   (वीरुत्, वनस्पतिः, ओषधिः, वृक्षः )

४. दशपुत्रसमो ..............। ..........................................
   ( द्रुमः, पुत्रः, सरः, कूपः )

५. सस्यविज्ञानस्य सूचना महाभारतस्य कस्मिन् पर्वणि दृश्यते? ..........................................
   (सभापर्वणि, शान्तिपर्वणि, वनपर्वणि, भीष्मपर्वणि )

६. किं गणे नान्तर्भवति? ..........................................
   (आम्रः, नालिकेरः, पनसः, पूगः )

# एककम् - २

# पैतृकम्

## पाठः - ४. कनकधारा।

**1. श्लोकानि पठित्वा गद्यक्रमं लिखत।**

**क)** स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित्।।

गुरोः कुले .................................... .................................... सवयोभिः सह .................................... कस्यचित् .................................... द्विजन्मनः .................................... विवेश हि।

**ख)** तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते।।

तत्र गृहिणः कुटुम्बिनी .......... ......................... सादरं ............................ ये .................................... वरिवस्यां .................................... ते कृतिनः हि।

**घ)** अमरस्पृहणीयसम्पदं
द्विजवर्यस्य निवेशमात्मवान्।
स विधाय यथापुरं गुरोः
सविधे शास्त्रवराण्यशिक्षत।।

आत्मावान् सः .................................... निवेशं .................................... विधाय .................................... गुरोः .................................... शास्त्रवराणि ..............................

ग) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम्।।

वयं .................................... वञ्चिता खलु ............................... वटवे ...................... वितरीतुं .................................... । इदं जन्म .................................... गतं धिक्।

**2.** ब्राह्मणस्य भवन **सुवर्णधात्रीफलैः अपूरयत्** इत्यर्थक श्लोक चित्वा लिखत।

१) इति दीनमुदीरयन्त्यसौ
प्रददावामलकं व्रतीन्दवे।
करुणं वचनं निशम्य सोऽ-
प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।।

२) अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनतायाः हृदयं च विस्मयैः।।

.....................................................................................................................

.....................................................................................................................

.....................................................................................................................

.....................................................................................................................

**3.** **"अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकं गतम्"** इत्यर्थक श्लोक चित्वा लिखत।

१) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम्।।

२) स मुनिर्मुरभित्कुटुम्बिनीं
पदचित्रैर्नवनीतकोमलैः।
मधुरैरुपतस्थिवांस्तवै-
र्द्विजदारिद्र्यदशानिवृत्तये।।

.....................................................................................................................

.....................................................................................................................

.....................................................................................................................

.....................................................................................................................

**4. वरिवस्यां प्रतिपादयन्ति ते कृतिनः** इत्याशयसूचक श्लोक चित्वा लिखत।

१) तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते।।

२) स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित्।।

..............................................................................................................

..............................................................................................................

..............................................................................................................

..............................................................................................................

**5. श्लोकस्य उचितमाशयं चित्वा लिखत।**

इति दीनमुदीरयन्त्यसौ
प्रददावामलकं व्रतीन्दवे।
करुणं वचनं निशम्य सोऽ-
प्यभवज्ज्ञाननिधिर्दयार्द्रधीः।।

१. ब्रह्मचारिश्रेष्ठानां पूजां कुर्वन्तः पुण्यवन्तः एव।
२. कुटुम्बिन्याः सकरुणं वचनमाकर्ण्य शङ्करः दयार्द्रहृदयः अभवत्।
३. स्तवेन सन्तुष्टा कमला भवनं सुवर्णामलकैः पूरयामास।

..............................................................................................................

**6. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित्।।

१. भगवान् कीदृशस्य द्विजन्मनः भवनं विवेश? ..................................................

२. भगवान् किमर्थं द्विजन्मनः भवनं विवेश? ..................................................

३. श्लोकात् एकं शत्रन्तरूपं चित्वा लिखत। ..................................................

४. श्लोके गृहमित्यर्थकं पदं किम्? ..................................................

**7. उदाहरणानुसारं पट्टिकां पूरयत।**

| | कृतिः | विभागः | कर्ता |
|---|---|---|---|
| उदा - | *रामायणम्* | *इतिहासः* | *वाल्मीकिः* |
| | शङ्करदिग्विजयम् | ................ | माधवविद्यारण्यस्वामी |
| | कनकधारास्तोत्रम् | स्त्रोत्रकाव्यम् | ................ |
| | महाभारतम् | ................ | व्यासः |
| | वृक्षायुर्वेदः | शास्त्रग्रन्थः | ................ |

**8. प्रादेशिकभाषया लिखत।**

श्रीशङ्कराचार्येण विरचितं स्त्रोत्रकाव्यं भवति सौन्दर्यलहरी। तस्मिन् देवस्तुतिः चारुतया काव्यरूपेण कृता। शिवपत्न्याः शक्त्याः स्तुतिरूपेयं कृतिः। तत्र शतं श्लोकाः विद्यन्ते। सौन्दर्यलहर्यां वेद-मन्त्र-तन्त्र-अलङ्कारशास्त्रादयः च अन्तर्भूताः वर्तन्ते।

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

**9. सम्भाषणांशान् पूरयत।**

शङ्करः - अम्ब! भिक्षां देहि।

गृहिणी - अतितेजस्वी बालः। कस्त्वम्? ................ आगतवान्?

शङ्करः - मातः! शङ्करोऽहम्। समीपस्थात् गुरुकुलात् आगतवान्।

गृहिणी - ................ आगतवान्?

शङ्करः - भिक्षार्थम् आगतवान्।

गृहिणी - दारिद्र्यात् भिक्षां दातुम् अहम् असमर्था।

शङ्करः - ................! चिन्ता मास्तु।

गृहिणी - वत्स! अत्र केवलम् ................एव अस्ति।

शङ्करः - आमलकं वा? दीयताम्। भवत्याः दारिद्र्यनिवारणाय प्रार्थयाम्यहम्।

**10. समानार्थकपदानि यथोचितं योजयत।**

| | | |
|---|---|---|
| आमलकम् | - | ब्रह्मचारी |
| भवनम् | - | लक्ष्मीः |
| वटुः | - | धात्रीफलम् |
| कमला | - | गृहम् |

**आमलकम्** - ...............................

**भवनम्** - ...............................

**वटुः** - ...............................

**कमला** - ...............................

**11. उदाहरणानुसारं लिखत।**

**उदा- सादरम् - आदरेण सह वर्तते।**

साश्चर्यम् - .....................................

सामोदम् - .....................................

**उदा- धनेन हीनः - धनहीनः**

........................... - ज्ञानहीनः

........................... - धैर्यहीनः

**12. उदाहरणानुसारं पदच्छेदं लिखत।**

**उदा- अप्यभवत् - अपि + अभवत्**

इत्यपि - ............. + .............

इत्यत्र - ............. + .............

**उदा- धिगिदम् - धिक् + इदम्**

वागीशः - ............. + .............

वागियम् - ............. + .............

## 13. सूचनानुसारं जीवनचरितं लिखत।

**सूचनाः -**

| | | |
|---|---|---|
| नाम | - | बालगङ्गाधरतिलकः। |
| जन्म | - | १८५६ जूलै २३ महाराष्ट्रा। |
| पितरौ | - | गङ्गाधररामचन्द्रतिलकः, पार्वती बाई। |
| कर्ममण्डलम् | - | सामाजिकपरिष्करणं, स्वातन्त्र्यसंग्रामः। |
| देहवियोगः | - | १९२० आगस्ट् १ मुम्बई। |

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

..................................................................................................................................

## 14. प्रादेशिकभाषया लिखत।

पौराणिकभारतीयाः संस्यसंरक्षणे तत्पराः आसन्। अतः ते गृहं परितः विविधानि सस्यानि परिपालयन्ति स्म। प्रायेण सर्वाणि सस्यानि औषधगुणयुक्तानि भवन्ति। सुरपालस्य वृक्षायुर्वेदे औषधसस्यान्यधिकृत्य सविशदं प्रतिपादयन्ति।

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

..................................................................................................................

## 15. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम्।।

१. किं निरर्थकं गतम्? ........................................

२. वयं केन वञ्चिताः? ........................................

३. कस्मै भैक्ष्यं वितरीतुं न शक्नुमः? ........................................

४. श्लोके निष्प्रयोजनम् इत्यर्थे प्रयुक्तं पदं किम्? ........................................

**16. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

१. शङ्करदिग्विजयस्य कर्ता कः? ..................................................

( श्रीशङ्करः, माधवविद्यारण्यस्वामी, सुरपालः, कालिदासः)

२. अद्वैतचिन्ताप्रतिष्ठापकः कः? ..................................................

(माधवविद्यारण्यस्वामी, श्रीशङ्करः, श्रीनारायणगुरुः, चिन्मयानन्दस्वामी)

३. कनकधारास्तवं केन विरचितम्? ..................................................

( सुरपालेन, चरकेण, श्रीशङ्करेण, कालिदासेन)

४. धिक् शब्दयोगे का विभक्तिः? ..................................................

(तृतीया, द्वितीया, पञ्चमी, प्रथमा)

५. शङ्करदिग्विजयं नाम काव्यं कस्मिन् विभागे अन्तर्भवति? ...............................

(खण्डकाव्ये, सन्देशकाव्ये, महाकाव्ये, चरित्रकाव्ये)

**17. खण्डिकां पठित्वा जीवचरित्ररूपरेखां लिखत।**

आधुनिकभारतस्य शिल्पिः जवहर् लाल् नेहरु महाशयः। १८८९ तमे वर्षे नवम्बर् मासे १४ तमे दिने जनिमलभत। तस्य पितुः नाम मोत्तिलाल् नेहरु, मातुः नाम स्वरूपाराणी इति चासीत्। स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिपदं स्वीकृत्य १९४७ -१९६४ वर्षकालपर्यन्तं राज्यशासनं कृतवान्। प्रशस्तात् केम्ब्रिड्ज् विश्वविद्यालयात् स्नातकपरीक्षाम् उत्तीर्णवान्। १९१६ तमे वर्षे कमलां परिणीतवान्। "डिस्कवरि ओफ् इन्ड्या", "आन् ओट्टोग्राफी" इत्यादयः तस्य प्रसिद्धाः कृतयः भवन्ति। नेहरु महाभागः १९६४ तमे वर्षे मेय् मासस्य २७ तमे दिने यशःशरीरोऽभवत्।

नाम - ..............................................

जननम् - ..............................................

पितरौ - ..............................................

प्रशस्तिः - ..............................................

कृतयः - ..............................................

देहवियोगः - ..............................................

***

# उत्तरसूचिका

## पाठः -१. आयुरारोग्यसौख्यम्।

**1. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।**

क) परिश्रममिताहारौ।

ख) आत्मा।

ग) आरोग्यम्।

घ) दाक्ष्यम्।

**2. सूचनानुसारं गद्यक्रमं लिखत।**

क) परिश्रमः मिताहारः भूगतौ अश्विनीसुतौ तौ अनादृत्य अन्यं वैद्यं अहं नैव समाश्रये।

ख) अर्थः शनैः पन्थाः शनैः शनैः पर्वतम् आरुहेत्, विद्या शनैः धर्मः च शनैः व्यायामः च।

ग) सुखदुःखयोः कर्तारम् आत्मानमेव मन्येत। तस्मात् श्रेयस्करं मार्गं प्रतिपद्येत न त्रसेत्।

घ) धन्यानां दाक्ष्यम् उत्तमम्। धनानां श्रुतम् उत्तमम्। लाभानाम् आरोग्यं श्रेष्ठम्। सुखानां तुष्टिः उत्तमा भवति।

3. लेखनावसरे उचित घटना, आशयपूर्णता, भाषाशुद्धिः च आवश्यकाः।

**4. उदाहरणानुसारं लिखत।**

प्राणी - प्राणः अस्य अस्तीति प्राणी।

हिताहारः - हितश्च असौ आहारश्च।

**5. श्लोकानामाशयं कोष्ठकात् चित्वा लिखत।**

क) परिश्रमः मिताहारः च आरोग्याय उत्तमं भवति।

ख) पथि गमनं, पर्वतारोहणं मन्दमेव करणीयम्।

ग) स्वस्थचित्तेन सेव्यमानः अन्नम् आरोग्याय भवति।

घ) सुखदुःखयोः कारणं स्वकर्म एव।

ङ) लाभानाम् आरोग्यं श्रेष्ठम्।

**6. श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत।**

क) परिश्रमः।

ख) परिश्रमः, मिताहारः।

ग) न + एव।

घ) अनादृत्य।

**7. "जीविते सुखस्य दुःखस्य च हेतुः स्वस्य कर्म एवेति अवगच्छेत्" इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत।**

ख) आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्।।

**8. उदाहरणानुसारं पदच्छेदं लिखत।**

**क)** चैव - च + एव।
अत्रैव - अत्र + एव।
तत्रैव - तत्र + एव।

# पाठः - 2. दीनवत्सला जननी।

**1. उदाहरणानुसारं पदच्छेदं लिखत।**

**क)** गच्छन्नासीत् - गच्छन् + आसीत् ।
पठन्नासीत् - पठन् + आसीत् ।
वदन्नासीत् - वदन् + आसीत् ।
रुदन्नासीत् - रुदन् + आसीत् ।

**ख)** ग्रन्थेष्वन्यतमः - ग्रन्थेषु + अन्यतमः
काव्येष्वन्यतमः - काव्येषु + अन्यतमः
विषयेष्वन्यतमः - विषयेषु + अन्यतमः

**ग)** नोचितः - न + उचितः
नोदितः - न + उदितः

**2. शतृशानजन्तरूपाणि विविच्य पट्टिकां लिखत।**

| शत्रन्तरूपाणि | शानजन्तरूपाणि |
|---|---|
| पठन् | नुद्यमानः |
| प्रेरयन् | गम्यमानः |
| पचन् | जल्पमानः |
| रुदन् | वन्दमानः |
| लिखन् | पचमानः |
| गच्छन् | पठ्यमानः |
| ताडयन् | कम्पमानः |

**3. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।**

क) सुरभिः।
ख) बलीवर्दः।
ग) महाभारते।
घ) पचमानः।
ङ) सुराधिपस्य।

**4. उदाहरणानुसारं पट्टिकां पूरयत।**

क)

| लङ् | लट् | लोट् |
|---|---|---|
| अपठत् | पठति | पठतु |
| अवदत् | वदति | वदतु |
| अलिखत् | लिखति | लिखतु |
| अभवत् | भवति | भवतु |
| अपृच्छत् | पृच्छति | पृच्छतु |

ख)

| लट् | लोट् | विधिलिङ् |
|---|---|---|
| लिखति | लिखतु | लिखेत् |
| वदति | वदतु | वदेत् |
| गच्छति | गच्छतु | गच्छेत् |
| भवति | भवतु | भवेत् |
| गायति | गायतु | गायेत् |

**5. यथोचितं योजयत।**

महाभारतम् - व्यासः

सुरभिः - धेनूनां माता

कृषक ! - सम्बोधना

आखण्डलः - इन्द्रः

**6. क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि विविच्य लिखत।**

| क्त्वान्तपदानि | ल्यबन्तपदानि | तुमुन्नन्तपदानि |
|---|---|---|
| पठित्वा | निशम्य | पठितुम् |
| पीत्वा | परिपाल्य | वोढुम् |
| लेखित्वा | समेत्य | चलितुम् |
| श्रुत्वा | विज्ञाय | श्रोतुम् |
| गत्वा | प्राप्य | गन्तुम् |

**7. कोष्ठकात् समानार्थकपदानि चित्वा लिखत।**

इन्द्रः - वासवः

तनयः - पुत्रः

नयनम् - नेत्रम्

बलीवर्दः - ऋषभः

**8. उदाहरणानुसारं विग्रहं लिखत।**

देवाधिपः - देवानाम् अधिपः।

धनाधिपः - धनानाम् अधिपः।

नराधिपः - नराणाम् अधिपः।

**9. कोष्ठकात् पदानि स्वीकृत्य अधोदत्तान् सम्भाषणांशान् लिखत।**

इन्द्रः - वत्से ! **किमर्थं** विलपति ?

सुरभिः - भो **वासव** ! मम पुत्रस्य दैन्यतां दृष्ट्वा विलपामि।

इन्द्रः - पुत्रस्य किम् अभवत् ?

सुरभिः - मम दुर्बलं पुत्रं कृषकः **ताडयति।**

इन्द्रः - सहस्राधिकपुत्रवती भवती किमर्थम् अस्मिन् पुत्रे **अधिकवात्सल्यम्** प्रकटयति ?

सुरभिः - दुर्बले सुते अधिकवात्सल्यं मातृसहजा एव।

इन्द्रः - चिन्ता मास्तु। सर्वं शुभं जायेत।

**10. खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत।**

१. व्यासः।

२. प्रपञ्चेऽस्मिन् - प्रपञ्चे + अस्मिन्।

३. "व्यासोच्छिष्टं जगत्सर्वम्"।

४. अनुकम्पा।

**11. अधोदत्तवाक्यात् सम्बोधनरूपाणि चित्वा लिखत।**

१. वत्से !

२. शुभे !

३. वासव !

**12. प्रादेशिकभाषया लिखत।**

आशयग्रहणलेखनमावश्यकम्।

उचितरीत्या विवर्तनमावश्यकम्।

भाषाशुद्धिः आवश्यकी।

**13. उदाहरणानुसारं वाक्यं परिवर्तयत।**

क) **यद्यपि** मातुः बहवः पुत्राः सन्ति **तथापि** दीने पुत्रे कृपार्द्रहृदया भवति।

ख) **यद्यपि** जनाः मृगशालाम् अगच्छन् **तथापि** तत्र प्रवेशनं न लभ्यते।

ग) **यद्यपि** रमेशः यथासमयं बस् निस्थानं प्रप्तः **तथापि** बस् न लब्धम्।

घ) **यद्यपि** पितामहः सम्पूर्णम् औषधं अपिबत् **तथापि** रोगशमनं न अभवत्।

ङ) **यद्यपि** ग्रन्थालये अनेकानि पुस्तकानि सन्ति **तथापि** कानिचित् उपयोगशून्यानि आसन्।

# पाठः -३ मधुमान् नो वनस्पतिः।

**1. अधोदत्तानाम् औषधसस्यानां गुणान् लिखत।**

हरिद्रा - सर्वविषहारिणी।
आमलकी - ऊर्जप्रदायिनी।
निम्बः - व्रणनाशकः।
तुलसी - विषहारिणी।

**2. वृक्षः वनस्पतिः वीरुत् ओषधिः इति क्रमेण सस्यानां पट्टिकां लिखत।**

| **वृक्षः** | **वनस्पतिः** | **वीरुत्** | **ओषधिः** |
|---|---|---|---|
| पूगः | पनसः | द्राक्षा | कदली |
| आम्रः | अश्वत्थः | कर्कटी | इक्षुः |
| नालीकेरः | उदुम्बरः | कूश्माण्डः | गोधूमः |
| | | कारवेलः | व्रीहिः |

**3. अधोदत्ताः सूचनाः स्वीकृत्य सस्यसंरक्षणम् अधिकृत्य लघुटिप्पणीं लिखत।**

लेखनावसरे उचितघटना, आशयपूर्णता, भाषाशुद्धिः च आवश्यकाः।

**4. अधोदत्ताः सूचनाः स्वीकृत्य "सस्यप्रभेदाः" अधिकृत्य लघुटिप्पणीं लिखत।**

उचितघटना, आशयपूर्णता, भाषाशुद्धिः च आवश्यकाः।

**5. कोष्ठकात् पदानि स्वीकृत्य पट्टिकां लिखत।**

| **विभागः** | **लक्षणम्** | **उदाहरणम्** |
|---|---|---|
| **वनस्पतिः** | अव्यक्तपुष्पः | पनसः |
| वृक्षः | **फलात् पूर्वं पुष्पम्** | आम्रः |
| वीरुत् | प्रतानैः प्रसारिता | **कर्कटी** |
| **ओषधिः** | फलपाकान्ता | कदली |

**6. यथोचितं योजयत।**

वृक्षायुर्वेदः - सुरपालः
शान्तिपर्वः - महाभारतम्
दशपुत्रसमः - द्रुमः
अव्यक्तपुष्पः - पनसः

**7. उदाहरणानुसारं लिखत।**

**क)** भूपतिश्च - भूपतिः + च
कविश्च - कविः + च
प्रजापतिश्च - प्रचापतिः + च
वायुरस्ति - वायुः + अस्ति
गुरुरयम् - गुरुः + अयम्

विष्णुरपि - विष्णुः + अपि
नाटकेऽस्मिन् - नाटके + अस्मिन्
काव्येऽस्मिन् - काव्ये + अस्मिन्
लोकेऽस्मिन् - लोके + अस्मिन्

**8. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

१. वापी।
२. सुरपालः।
३. वनस्पतिः।
४. द्रुमः।
५. शान्तिपर्वणि।
६. पनसः।

## पाठः - ४. कनकधारा।

**1. श्लोकानि पठित्वा गद्यक्रमं लिखत।**

**क)** गुरोः कुले वसन् भैक्ष्यलिप्सया सवयोभिः सह जातु कस्यचित् धनहीनस्य द्विजन्मनः भवनं विवेश हि।

**ख)** तत्र गृहिणः कुटुम्बिनी तं वटुवर्यं सादरं अवोचत। ये भवादृशेषु वरिवस्यां प्रतिपादयन्ति ते कृतिनः हि।

**घ)** आत्मावान् सः द्विजवर्यस्य निवेशं अमरस्पृहणीयसम्पदं विधाय यथापुरं गुरोः सविधे शास्त्रवराणि अशिक्षत।

ग) वयं विधिना वञ्चिता खलु अकिञ्चनत्वतः वटवे भैक्ष्यं वितरीतुं न शक्नुमः इदं जन्म निरर्थकं गतं धिक्।

**2.** ब्राह्मणस्य भवनं **सुवर्णधात्रीफलैः अपूरयत्** इत्यर्थकं श्लोकं चित्वा लिखत।

२) अमुना वचनेन तोषिता कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय- ज्जनतायाः हृदयं च विस्मयैः।।

**3. "अपरेषां कृते प्रयोजनरहितं जन्म निरर्थकं गतम्"** इत्यर्थकं श्लोकं चित्वा लिखत।

१) विधिना खलु वञ्चिता वयं वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो धिगिदं जन्म निरर्थकं गतम्।।

**4. वरिवस्यां प्रतिपादयन्ति ते कृतिनः** इत्याशयसूचकं श्लोकं चित्वा लिखत।

१) तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते।।

**5. श्लोकस्य उचितमाशयं चित्वा लिखत।**

२. कुटुम्बिन्याः सकरुणं वचनमाकर्ण्य शङ्करः दयार्द्रहृदयः अभवत्।

**6. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

१. धनहीनस्य।

२. भैक्ष्यलिप्सया।

३. वसन्।

४. भवनम्।

**7. उदाहरणानुसारं पट्टिकां पूरयत।**

| कृतिः | विभागः | कर्ता |
|---|---|---|
| शङ्करदिग्विजयम् | **महाकाव्यम्** | माधवविद्यारण्यस्वामी |
| कनकधारास्तोत्रम् | स्त्रोत्रकाव्यम् | **श्रीशङ्करः** |
| महाभारतम् | **इतिहासः** | व्यासः |
| वृक्षायुर्वेदः | शास्त्रग्रन्थः | **सुरपालः** |

**8. प्रादेशिकभाषया लिखत।**

आशयग्रहणलेखनमावश्यकम्।

उचितरीत्या विवर्तनमावश्यकम्।

भाषाशुद्धिः आवश्यकी।

**9. सम्भाषणांशान् पूरयत।**

शङ्करः - अम्ब! भिक्षां देहि।

गृहिणी - अतितेजस्वी बालः। कस्त्वम्? **कुतः** आगतवान्?

शङ्करः - मातः! शङ्करोऽहम्। समीपस्थात् गुरुकुलात् आगतवान्।

गृहिणी - **किमर्थम्** आगतवान्?

शङ्करः - भिक्षार्थम् आगतवान्।

गृहिणी - दारिद्र्यात् भिक्षां दातुम् अहम् असमर्था।

शङ्करः - **मातः! / अम्ब!** चिन्ता मास्तु।

गृहिणी - वत्स! अत्र केवलम् **आमलकम्** एव अस्ति।

शङ्करः - आमलकं वा? दीयताम्। भवत्याः दारिद्र्यनिवारणाय प्रार्थयाम्यहम्।

**10. समानार्थकपदानि यथोचितं योजयत।**

आमलकम् - धात्रीफलम्

भवनम् - गृहम्

वटुः - ब्रह्मचारी

कमला - लक्ष्मीः

**11. उदाहरणानुसारं लिखत।**

साश्चर्यम् - आश्चर्येण सह वर्तते।
सामोदम् - आमोदेन सह वर्तते।
ज्ञानेन हीनः - ज्ञानहीनः
धैर्येण हीनः - धैर्यहीनः

**12. उदाहरणानुसारं पदच्छेदं लिखत।**

इत्यपि - इति + अपि
इत्यत्र - इति + अत्र
वागीशः - वाक् + ईशः
वागियम् - वाक् + इयम्

**13. सूचनानुसारं जीवनचरितं लिखत।**

लेखनावसरे उचितघटना, आशयपूर्णता, भाषाशुद्धिः च आवश्यकाः।

**14. प्रादेशिकभाषया लिखत।**

आशयग्रहणलेखनमावश्यकम्।
उचितरीत्या विवर्तनमावश्यकम्।
भाषाशुद्धिः आवश्यकी।

**15. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

१. जन्म।
२. विधिना।
३. वटवे।
४. निरर्थकम्

**16. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

१. माधवविद्यारण्यस्वामी।
२. श्रीशङ्करः।
३. श्रीशङ्करेण।
४. द्वितीया।
५. महाकाव्ये।

**17. खण्डिकां पठित्वा जीवचरित्ररूपरेखां लिखत।**

नाम - जवहर् लाल् नेहरु।
जननम् - १८८९ तमे वर्षे नवम्बर् मासे १४ तमे दिने।
पितरौ - मोत्तिलाल् नेहरु स्वरूपाराणी च।
प्रशस्तिः - स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रि।
कृतयः - 'डिस्कवरि ओफ् इन्ड्या", "आन् ओट्टोग्राफी"
देहवियोगः - १९६४ तमे वर्षे मेय् मासस्य २७ तमे दिने

***